# कारके प्रथमा विभक्तिः

राधाकृष्ण सुवेदी
rohit.subedi19@gmail.com

*आलेखसारः*

*पुरातनादद्यतनपर्यन्तं विश्वेऽस्मिन् सर्वासु भाषासु वैज्ञानिकम्, सूत्रबद्धम्, प्राचीनम्, सुस्थिरम्, सर्वजनमान्यतमञ्च पाणिनीयव्याकरणमेवास्ति। पाणिनिना विरचिते व्याकरणे विविधप्रकरणानि अनेकसूत्राणि च विद्यन्ते। तत्र व्याकरणस्य एकः प्रमुखपक्षः कारकप्रकरणमप्यस्ति। अस्मिन् आलेखे कारकपरिचयपूर्वकं 'कारके प्रथमा विभक्तिः' इति विषये 'प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा' इति सूत्रस्य विशेषतो लिङ्गमात्रे, परिमाणमात्रे, वचनमात्रे इत्येतेषु विषयेषु सम्यक् विवेचनं कृतमस्ति।*

**प्रमुखशब्दावली** – प्रातिपदिकम्, कारकः, प्रथमा, विभक्तिः, अनियतलिङ्गः।

## विषयप्रवेशः

लोके प्रसिद्धेषु संस्कृतव्याकरणेषु पाणिनीयव्याकरणशास्त्रस्य स्थानं सर्वोपरि विद्यते। तेषु व्याकरणशास्त्रेष्वपि कारकस्य महद्प्रयोजनमस्ति । **सर्वोपकारकं ज्ञेयं कारकं सर्वकारकम्** । मनुजो यथा हस्तादीन्द्रियमन्तरेण लेखनार्चनाद्द्वारा वागाधिष्ठात्रीं समुपासितुं सर्वथाऽसमर्थो भवति तथैवास्य सप्तविभक्तिमन्तरेण कारकत्वन्निहन्यते। अत एव सप्तविभक्तिविधायकसूत्राणां प्रकरणम् कारकप्रकरणम्। अस्यैव पाणिनीयव्याकरणस्य कारकप्रकरणस्य सप्तविभक्तिमध्येषु प्रथमाविभक्तेः विवेचनं वर्तते अस्मिन् आलेखे। प्रथमाविभक्तेः विवेचनेऽपि मूलतः प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (अ. २।३।४६) इति सूत्रस्य विस्तृता व्याख्या वर्तते।

प्रस्तुतोऽयमालेखः पाणिनीयव्याकरणशास्त्रे कारकस्य प्रयोजनं महत्त्वञ्च किम् ? कारकं नाम किम् ? पाणिनिना कति कारकाणि प्रयुक्तानि ? व्याकरणशास्त्रे कारकप्रकरणे सर्वप्रथमे प्रथमा विभक्तिः किमर्थं विहिता ? इत्येतासु समस्यासु केन्द्रीभूयानुसन्धानं विहितमस्ति। उपर्युक्तां प्रश्नात्मिकीं प्राज्ञिकीं शोधसमस्यां पुरस्कृत्य व्याकरणेषु मुख्यरूपेण प्रतिपादिता विषयाः, एवं कारकपरिचयपूर्वकं कारके प्रथमा विभक्तिः इति प्रसङ्गे प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (अ. २।३।४६) इत्यस्य विश्लेषणं प्रस्तुतस्य अनुसन्धानात्मकलेखस्योद्देश्यमस्ति।

## अध्ययनविधिः

अत्र पुस्तकालयेषूलब्धग्रन्थानामाधारेण लेख्यसामग्रीसङ्कलनपूर्वकं सम्बद्धविषयस्याध्ययनम्, अध्ययनार्थं सामग्रीसङ्कलनम्, विद्वज्जनैः सह परामर्शकरणञ्चेत्यादिविधयः आवश्यकतानुसारेण प्रयुक्ताः सन्ति। अत्र विशेषतया पाणिनीयव्याकरणशास्त्रसम्बद्धविविधग्रन्थेभ्यः यथावश्यकं सामाग्री गृहीत्वा तासां विश्लेषणं कृत्वा निष्कर्षः प्रस्तुतो विद्यते।

## क्षेत्रं सीमा च

अध्ययनमिदं पाणिनीयव्याकरणान्तर्गतं विद्यते । पाणिनिना विरचिते व्याकरणशास्त्रे विविधप्रकरणानि अनेकसूत्राणि च विद्यन्ते । सत्स्वपि विविधप्रकरणेषु प्रधानयाऽत्र कारकप्रकरणस्य प्रथमाकारकस्य इति विषये

चर्चा विहिता वर्तते। यद्यपि व्याकरणविषयसम्बद्धा विविधा ग्रन्थाः अध्येतुं शक्याः विषयप्रसङ्गाः प्राप्यन्ते। लघ्वालेखेऽस्मिन् पूर्वोक्तविषय एवाध्ययनं विहितं विद्यते। इति एषा एवाध्ययनस्यास्य निर्धारिता सीमा।

## कारकपरिचयः

क्रियाजनकत्वं कारकत्वम् अर्थात् क्रियानिष्ठजन्यतानिरूपितजनकतावत्वं कारकत्वम्। कर्तृकर्मादिव्यपदेशानाम् करोतीति कारकमिति विवक्षायां कारकशब्दः क्रियापरः, जनकमित्यध्याह्रियते, सप्तम्यर्थो निरूपितत्वम्, तस्य जनकशब्दार्थैकदेशजनकतायामन्वयः। एतेनापि क्रियाजनकत्वं कारकत्वमित्येव प्रसिद्ध्यति। अत्र कारक इति महती संज्ञा क्रियते। संज्ञा च यतो न लघीयाः। कुत एतत् ? लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करणे एतत् प्रयोजनम्। अन्वर्थसंज्ञा यथा विज्ञायेत – कर्त्तृकर्मादिव्यपदेशानामिति कारकम्। इत्युद्धरणम् शेषावतारगोनर्ददेशीयोद्भव श्रीपतञ्जलिमुनिविरचिते महाभाष्यः ग्रन्थे विद्यते। व्याकरणमहाभाष्ये कर्तृकर्मादिव्यपदेशानां कारकमितिवाक्याधारभूतत्वेन परिलक्षते यत् क्रियाजनकत्वाधारभूत-धर्मावच्छिन्नावधारवत्वङ्कारकम् इति। तथाहि –

(क) कियाप्रधानभूतत्वङ्कारकत्वम्।

(ख) धातुव्यापारस्पष्टार्थवाचकत्वङ्कारकत्वम्।

अत्र कारकत्वनिर्णये प्राचीननवीनवैयाकरणेषु मतैक्यं नास्ति। यतो हि "क्रियाश्रयत्वङ्कारकत्वम्" इति प्राचीनशाब्दिकाः मन्यन्ते परन्तु नवीनशाब्दिकास्तु 'क्रियाजनकत्वङ्कारकत्वम्' इति मन्यन्ते। वस्तुतस्तु कियाश्रयत्वपक्षे महत्याऽऽपत्तिः समापतति यथा– "ब्राह्मणस्य पुत्रं पन्थानं पृच्छति।" अत्र क्रियाश्रयत्वे सति ब्राह्मण इत्यत्रापि कर्मत्वेनाद्वितीया विभक्तिः भविष्यति। यतो हि पुत्र इति शब्दस्य परम्परया आश्रयभूतः ब्राह्मण इति विद्यते। पुनश्च ब्राह्मणं पुत्रं पन्थानं पृच्छति इति अनिष्टप्रयोगस्य आपत्तिः भविष्यति। अत एवः नवीनवैयाकरणानां पक्षे क्रियाजनकत्वङ्कारकत्वम् इति मान्यः। यत्र क्रियायाः साक्षात् जनकत्वं स्यात् तत्रैव कारकम्। अतः 'ब्राह्मणस्य पुत्रं पन्थानं पृच्छति' इत्यत्र साक्षात् कोऽपि यात्री पुत्रं पृच्छति न तु ब्राह्मणम्। एतदर्थं पुत्र इत्यत्र एव कारकत्वम्। 'लघ्वर्थं हि संज्ञाकारकम्' इति संज्ञा का ? इति जिज्ञासायां निवेद्यते यत् यया सञ्ज्ञायते अववुध्यते स्वरुपज्ञानङ्क्रियते, अवगम्यते वा असौ संज्ञा। संज्ञा इत्यत्र ज्ञा अवबोधने इति धात्वर्थवत्वात्। यतो हि ज्ञा इत्यस्यार्थो भवति अवबोधनम्। पुनः इत्यत्रापि 'अव' इति उपसर्गेण 'वुध् अवगमने' (बोधनमित्यत्र) इति धातोः व्यापारस्सञ्जातः। अवगमनं इत्यत्रापि 'गम्लृ गतौ' इति धातुः विद्यते। यस्यार्थो गमनं प्रापणं वा भवति। वैयाकरणजगति प्रसिद्धमिदं "ये ये गत्यर्थकाः, ते ते प्राप्यर्थकाः" इति जिज्ञासासमाधानत्वेन ग्रामङ्गच्छति प्राप्नोति वा।

**कारकाणां संख्या**

सामान्यरूपेण षट् कारकाणि भवन्ति। तानि च क्रमेण कर्तृकर्मकरणसम्प्रदानापादानाधिकरणानि।

**कर्ता कर्म च करणं संप्रदानं तथैव च।**
**अपादानाधिकरणं इत्याहुः कारकाणि षट्।।** (समासचक्रम् पृ. १९)

तत्र धात्वर्थव्यापाराश्रयः कर्ता। यथा – देवदत्तो गच्छतीत्यादौ संयोगानुकूलव्यापाराश्रयस्य देवदत्तस्य कर्तृत्वम्। धात्वर्थतावच्छेदकफलाश्रयः कर्म। यथा – ग्रामं गच्छति इत्यादौ संयोगाश्रयस्य ग्रामस्य कर्मत्वम्। क्रियासिद्धौ

प्रकृष्टोपकारकं करणम् । यथा – रामो बाणेन बालिनमवधीत् । इत्यत्र हननरूपक्रियायां प्रकृष्टोपकारकस्य बाणस्य करणत्वम् । दानस्य कर्मणा यस्य सम्बन्धोऽभिप्रेतः स सम्प्रदानम् । यथा – विप्राय गां ददाति । इत्यत्र दानस्य कर्मणा गवा विप्रस्य सम्बन्ध इति विप्रस्य संप्रदानत्वम् । विभागावधिभूतम् अपादानम् । यथा – वृक्षात् पर्णं पतति इत्यादौ पर्णविभागाऽवधिभूतस्य वृक्षस्य अपादानत्वम् । क्रियाया आधारः अधिकरणम् । यथा – गेहे तिष्ठति इत्यत्र स्थितिक्रियाया आधारस्य गेहस्याधिकरणत्वम् । सम्बन्धस्य न कारकत्वम् तेन सम्बन्धसामान्ये षष्ठी । षष्ठ्याश्च कारकत्वं नास्ति ।

**कारकस्य शाब्दिकं स्वरुपम्**

अत्र किं नाम कारकं ? इति धारणायां व्युत्पत्तिपक्षे डुकृञ् करणे धातोः ण्वुल् तृचौ (अ. ३।१।१३३) इति सूत्रेण कर्त्रर्थे ण्वुल् प्रत्यये कृ + ण्वुल् इति जाते ण् इत्यस्य चुटू (अ. १।३।७) इति सूत्रेण इत् संज्ञायां तस्यलोपः (अ. १।३।९) इत्यनेन लोपे कृ+वुल् इति जाते । पुनश्च ल् इत्यस्य हलन्त्यम् (अ. १।३।३) इति सूत्रेण इत् संज्ञायां, तस्यलोपः (अ. १।३।९) इत्यनेन लोपः सञ्जातः । पुनश्चः इदानीं कृ+वु इति स्थिते युबोरनाकौ (अ. ७।१।१)इति सूत्रेण वु इत्यस्य स्थाने अक आदेशे, णित्वात् अचोञ्णिति (अ. ७।२।११५) इत्यनेन वृद्धौ आर आदेशे, विभक्तिकार्ये च कृते विवक्षया नपुंसकत्वात् कारकम् इति । अत्र कारकम् इति शब्दे कत्रर्थज्ञापनार्थं ण्वुल्तृचौ (अ. ३।१।१३३) सूत्रमेव प्रमाणम् ।

**कारके प्रथमा विभक्तिः**

प्राधान्येन क्रियाया निष्पादकः कर्ता भवति – 'करोति' इति व्युत्पत्तेः । कर्ता एव क्रियायाः मुख्यस्य व्यापारस्याश्रयः । अकर्मकासुक्रियासु कर्ता क्रियायाः फलस्यापि आश्रयो भवति । कर्ता सर्वत्र क्रियासु प्रायेण प्रयुज्यन्ते । पाणिनिना 'स्वतन्त्र कर्ता' इति सूत्रे कर्तुः स्वतन्त्रता प्रतिपादिता । यत्र कर्ता मुख्यः उक्तः – कर्तरि प्रत्ययो यत्र भवति स उक्तो भवति, तत्र प्रथमा विभक्तिः प्रयुज्यते । यत्र च कर्ता अनुक्तः तत्र कर्तरि तृतीया विभक्तिः प्रयोगो भवति । अनुक्ते कर्तरि कारके तृतीया विभक्तिर्भवति । कर्तृकारकस्योदाहरणानि यथा – बालकः शेते । अहं व्याकरणं पठामि । माता आगच्छति । इत्यादि ।

**प्रातिपदिकार्थमात्रे**

यत्र हि अन्येषां साधनानां व्यापारो न भवति स कर्ता कारकः । प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (अ. २।३।४६) इति सूत्रेण प्रथमा भवति । नियतोपस्थितिकः प्रातिपदिकार्थः । नियता उपस्थितिः यस्य स नियतोपस्थितिकः । नि पूर्वक यम् धातो व्यापकत्वमर्थः । आश्रयश्च क्तार्थः । षष्ठ्यर्थश्च विषयता । तथा च व्यापकताश्रयोपस्थितिविषयत्वं प्रातिपदिकार्थत्वमिति शब्दतो लभ्यते । प्रातिपदिकार्थमात्रे लिंगमात्राधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यादिति सूत्रार्थः । प्रकृते प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (अ. २।३।४६) इदं सूत्रं विधिसूत्रं विद्यते । सूत्रमिदं द्विपदात्मकम् । मात्रे इत्यन्तं प्रथमं सप्तम्यन्तं पदम् । प्रथमा इति द्वितीयं प्रथमान्तं पदम् । प्रातिपदिकार्थश्च, लिङ्गञ्च, परिमाणञ्च, वचनञ्च = प्रातिपदिकार्थलिङ्गपरिमाणवचनानि । तानि एव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रम् । अत्र मयूरव्यंसकादित्वात् समासः । तस्मिनं् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे इति । अष्टाध्याय्यां कर्मणि द्वितीया (अ. २।३।२ ) चतुर्थी सम्प्रदाने (अ. २।३।१३) इत्यादिषु बहुषु स्थलेषु अर्थनिर्देशायैव सप्तम्यन्तपदप्रयोगस्य दृष्टत्वात् प्रथमाविभक्त्यन्तस्य च विधेयनिर्देशनपरत्वाद् अत्रापि प्रातिपदिकार्थलिङ्गपरिमाणवचनरूपेष्वर्थेषु प्रथमा

विधीयत इति सूत्रार्थः। तत्रेयं जिज्ञासा जागर्ति यत् – किं नाम प्रातिपदिकम् कश्च प्रातिपदिकार्थः ? इति।

पदं पदं इति प्रतिपदं प्रतिदमर्हतीति प्रातिपदिकं प्रातिपदिकस्यार्थः प्रातिपदिकार्थः। अत्र षष्ठीतत्पुरुषसमासो वर्तते । प्रातिपदिकार्थश्च, लिङ्गञ्च, परिमाणञ्च, वचनञ्च प्रातिपदिकार्थलिङ्गपरिमाणवचनम् । अत्र समाहारद्वन्द्वसमासः। प्रातिपदिकार्थलिङ्गपरिमाणवचनानि एव प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रम्। तस्मिन् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे। अत्र मात्र शब्दस्य प्रातिपदिकार्थे, लिङ्गे, परिमाणे, वचने च प्रत्येकमन्वय इत्यर्थः । द्वन्द्वसमासविधानत्वात् । प्रातिपदिकसंज्ञकविषये अर्थवदधातुरप्रत्ययः प्रातिपदिकम् ( अष्टाध्यायी १।२।४५।।) तथा च कृत्तद्धितसमासाश्च (अष्टाध्यायी १।२।४६।।) इति द्वे सूत्रे स्तः। उभाभ्यां सूत्राभ्यां प्रातिपदिकसंज्ञा भवति, तदेव प्रातिपदिकम् । प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (अ. २।३।४६) । इत्यनुशासनात् प्रातिपदिकार्थ एव प्रथमायाः विभक्त्या अर्थः । प्रातिपदिकार्थश्चैत्रादिरेव प्रथमार्थः । उक्तञ्च नागेशेन – सूत्रमते तु कर्तृकर्माद्यर्थकप्रत्ययेन कत्र्रादेरुक्तत्वात् प्रथमायाः प्रातिपदिकार्थ स्वार्थः । प्रथमा वाच्यः, प्रातिपदिकार्थश्च व्यक्तिरूपः। ( नागेशः पृ.९१)

प्रातिपदिकसंज्ञकविषये पुनश्च –

(क) धातुप्रत्ययप्रत्ययान्तभिन्नत्वे सत्यर्थवत्वं प्रातिपदिकम्।

(ख) विभक्त्यर्थशून्यत्वे सति व्यक्ति मात्रार्थवत्वं प्रातिपदिकम्। (सर्वलक्षणसङ्ग्रहः पृ. ९०)

अपि च, नियतोपस्थितिकगुणधर्मावच्छिन्नार्थवत्वन्तत्तल्लक्ष्यनियताधारभूतत्वञ्च प्रातिपदिकत्वम् इति । अत्र श्रीमद्भट्टोजि-दीक्षितमहाभागमतानुसारेण नियोपस्थितिकः प्रातिपदिकार्थः नियता = लक्ष्याधारिता उपस्थितिर्यस्य इति विग्रहात् । यस्मिन् प्रातिपदिके उच्चारिते सति यस्यार्थस्य नियमेनोपस्थितिः भवति, स एव प्रातिपदिकार्थ इति । यथा 'उच्चैः' इत्युच्चारिते उच्चाधिकरणस्य, 'नीचैः' इत्युच्चारितेऽधोऽधिकरणस्य, 'कृष्णः' इत्यत्र पुंस्त्वविशिष्टवासुदेवरुपार्थस्य, 'श्रीः' इत्यत्र स्त्रीत्वविशिष्टलक्ष्मीरुपार्थस्य, 'ज्ञानम्' इत्यत्र क्लीबत्वविशिष्टान्तर्बोधस्य च भानात्तेऽर्था नियतोपस्थितिकाः। तथा च व्यापकताश्रयोपस्थितिविषयत्वं प्रातिपदिकार्थत्वं इति शब्दतो लभ्यते। इत्येव प्रातिपदिकार्थ इति। यथा 'गौः' 'पटः' 'घटः' इत्यादयः। उदाहरणत्वेन 'अयं घटः' इति शब्दोच्चारणेन कम्बुग्रीवादिमत्वधर्मावच्छिन्नार्थस्योपस्थितिरेव जायते। अत एव 'घट' इति शब्दस्य अयमेवार्थः।

**लिङ्गमात्रे**

वैयाकरणसिद्धान्ते पञ्चकं प्रातिपदिकार्थ इति स्वीकारात् लिङ्गस्यापि प्रातिपदिकार्थत्वेन तटादिशब्देऽपि प्रातिपदिकार्थत्वादे प्रथमासिद्धौ लिङ्गग्रहणं चेन्न, लिङ्गग्रहणसामर्थ्येन पारिभाषिकस्य नियतोपस्थितिकत्वरूपस्य प्रातिपदिकार्थत्वस्य प्रकृतेः ग्रहणेन अनियतलिङ्गे तटादिशब्दे प्रथमासिद्ध्यर्थं लिङ्गग्रहणस्यावश्यकत्वात् । न च लिङ्गमात्रे इत्यस्य लिङ्गमात्रार्थबोधकत्वे सति लिङ्गेतरार्थाबोधकत्वार्थस्वीकारेण तटादौ प्रातिपदिकार्थेतरस्तद्बोधकात् लिङ्गबोधकात् प्रथमेत्यर्थात्। तेन प्रातिपदिकार्थापेक्षयालिङ्गमात्रं यत्राधिकं भाषते तत्रैव लिङ्गमात्रे इत्यनेन प्रथमा इति बोधनाय लिङ्गमात्राधिक्ये प्रथमा इति उक्तम्।

(क) पुंसोऽसाधारणचिन्हं लिङ्गम्।

(ख) व्याप्तिविशिष्टपक्षधर्मताविशिष्टहेतुर्लिङ्गम्। (सर्वलक्षणसङ्ग्रहः पृ. ११२)

यथा लिङ्गविचारः लोके भवति, शास्त्रे तथा न। उदाहरणत्वेन पुरुषः, स्त्री, कुलम्। परन्तु शास्त्रे 'हिमः' 'हिमानी' 'अरण्यम्' 'अरण्यानी' इत्यादयः। परमत्रः प्रकृतौ शास्त्राङ्गभूतलिङ्ग मात्रस्य चर्चा विद्यते। लिङ्गस्य भेदास्त्रयः सन्ति –

१. पुंल्लिङ्गम्। २. स्त्रीलिङ्गम्। ३ नपुंसकलिङ्गम्। लिङ्गविषये महाभाष्येऽपि कथितमस्ति। यथा –

**स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।**

**एभयोरन्तरं यच्च तदभावे नपुंसकम्॥** (महाभाष्यम् ४।१।३)

शब्दाः त्रिविधा – १. अलिङ्गाः। २. नियतलिङ्गाः ३. अनियतलिङ्गाः।

वस्तुतः केचन शब्दाः नियतलिङ्गाः विद्यन्ते, तथा च केचन अनियतलिङ्गाः। यथा – 'तटः, तटी, तटम्' इति अनियतलिङ्गाः। 'प्रमाणम्, वेदः, लेखनी, बाला' इति नियतलिङ्गाः। अनियतलिङ्गकेभ्यस्तटादिशब्देभ्यो लिङ्गस्य नियतोपस्थितिकत्वाऽभावेन प्रातिपदिकार्थपदेनाग्रहणात् न प्रातिपदिकार्थमात्रे प्रथमा किन्तु लिङ्गमात्रे एव। अत्र शब्दाः नियतलिङ्गाः भवन्तु अथवा अनियतलिङ्गाः भवन्तु। उभयत्र प्रथमाविभक्तिरेव भवति। अत आह मूले अनियतलिङ्गस्तु लिङ्गमात्राधिक्ये इत्यस्य उदाहरणम्। इत्येव लिङ्गमात्रे।

**परिमाणमात्रे**

परिमितव्यवहारासाधारणकारणम्, इति सिद्धान्तमुक्तावली। परिमाणं निरूपयतीतिपरिमाणम्। परिमितव्यवहारासाधारणं कारणं परिमाणमित्यर्थ। परिमाणमाऽत्रे प्रथमा भवति। किञ्च तत् परिमाणम्। मान–व्यवहारासाधारणकारणं परिमाणम्। अपि दण्डादिवारणाय मानेति, कालादिवारणायासाधारणेति, शब्दत्ववारणाय कारणमिति परिमाणम्। अस्योल्लेखः 'सर्वलक्षणसङ्ग्रह' इति नामके पुस्तके विद्यते। सामान्यार्थग्रहणत्वेन 'परिमीयते तोलनं क्रीयते येन तत् परिमाणम्। अथवा परिमीयते मापनङ्क्रियते इति परिमाणम्।'

प्रकृते 'द्रोणो व्रीहिः' इत्युदाहरणं वर्तते, परिमाणस्य तथैव पञ्चकिलोपरिमितं तण्डुलमिति प्रयोगः भवितुं शक्यते। परमिह सिद्धान्ते परिमाणज्ञानसम्पादनार्थं 'द्रोणो व्रीहि' इति वाक्यस्य प्रयोगः न भवति, अपितु परिमाणमात्रे प्रथमा विभक्तेर्विधानं भवति, इति ज्ञापनाय बालमनोरमायामपि – ननु द्रोणशब्दस्य परिमाणविशेषवाचिनो नियतपुंलिङ्गत्वे प्रातिपदिकार्थमात्रे इत्येव सिद्धम्। यदि तु अस्त्रियामढकद्रोणौ इति द्विलिङ्गता, तर्हि लिङ्गमात्राधिक्ये इत्येव सिद्धम्। तत् किं परिमाणग्रहणेन इति। नहि द्रोणत्वेन रूपेण परिमाणविषेशवाचिद्रोणशब्दात् स्वार्थे प्रथमा विभक्तिरिष्यते, येन प्रातिपदिकार्थमात्रं गतार्थका स्यात्। किन्तु द्रोणत्वेन परिमाणवाचिनो द्रोणशब्दात् परिमाणत्वसामान्यरूपेण द्रोणपरिमाणे विवक्षिते प्रथमा विभक्तिर्विधीयते। ततश्च प्रत्ययार्थे परिमाणसामान्ये विशेषात्मका भेदसंसर्गेणान्वेति।

परिमाणसामान्यात्मकप्रत्ययार्थस्तु परिच्छेद्यपरिछेदकभावेन व्रीहावन्वेति। तथा च द्रोणाख्य परिमाणविशेषात्मकं यत् सामान्यपरिमाणं तत्परिच्छिन्नो व्रीहिरिति बोधः फलति। अन्यथा द्रोणाख्य परिमाणविशेषपरिच्छिन्नो व्रीहिरिति बोधस्यात्। परिमाणसामान्यं न प्रतीयेत। तदर्थमिह परिमाणग्रहणमित्यर्थः। तथा च मानमेययोः परस्परसम्बन्ध एव शास्त्रे परिच्छेद्य परिच्छेदकभावत्वेन सम्बोध्यते। अनेन प्रकारेण 'द्रोणो व्रीहिः' इति वाक्ये 'द्रोण' इत्यत्रापि प्रथमैव ग्रहणं भवति। तदाह मूले द्रोणरूपं यत् परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः।

प्रत्ययार्थे प्रकृत्यर्थोऽभेदेन संसर्गेण विशेषणम्। प्रत्ययार्थस्तु परिच्छेद्यपरिच्छेदकभावेन व्रीहौ विशेषणमिति विवेकः।

**वचनमात्रे**

प्राचीनाचार्याणां व्यवहारात् वचनस्य संख्या अर्थः। व्याकरणे 'संख्या' इति कथनेन अर्थद्वयस्योपस्थितिर्भवति। प्रथमस्तु एकः, द्वौ, त्रयः, चत्वारः, पञ्च, षड्, सप्त, अष्ट, नवेत्यादयः। द्वितीयः संख्या संज्ञेति नाम्ना सम्बोध्यते। तत्र बहुगणवतुडतिसंख्या (अ. १।१।२३) सूत्रमिदं प्रमाणं वर्तते। परं वचनं संख्या इत्यत्र वचनशब्दः संख्यायाः अवबोधको वर्तते। यथा – एक+सु, द्वि+औ, बहु+जस् मूलत्वात् एकः, द्वौ, बहवः। यदि अत्र एकः, द्वौ, बहुवचनवाचकस्स्यात्, तर्हि पुनः सुबुत्पत्तौ आपत्तिर्भविष्यति, तथा च पुनरुक्तिदोषोत्पत्तिः प्रकृत्यर्थत्वात्। 'उक्तार्थानामप्रयोगः' इति नियमाधारीकृत्य एकद्विबहुशब्देभ्यो विभक्त्युत्पत्तिरसम्भवमेव। अतः सूत्रे वचनग्रहणमावश्यकम्। महाभाष्येऽपि कथितं यथा – उक्तेष्वप्येकत्वादिषु प्रथमा इति। मात्रग्रहणस्याशयस्सूत्रेऽयं यत् कारकाधिक्ये प्रथमा विभक्तेरतिक्रमणन्न स्यादिति विशेषः।

**सम्बोधने च**

सम्बोधने च (अ. २।३।४७) इह प्रथमा स्यात्। हे राम !। सूत्रमिदं विधिसूत्रं विद्यते। अनेन सूत्रेण सम्बोधनेऽधिके गम्येऽपि प्रथमा भवति। तत्र सम्बोधनङ्किमिति जिज्ञासायां सर्वलक्षणसङ्ग्रहे सम्यग्ज्ञापनन्तथान्यत्रासक्तस्याभिमुखीकरणं वेति लक्षणं प्रतिपादितम्। तथा व्युत्पत्तिपक्षेऽपि सम्बोध्यते 'सम्बोधनङ्क्रियते च।' इति सम्बोधनम्। बालमनोरमायामपि सम्बोधनमभिमुखीकृत्य ज्ञापनमिति। सिद्धपदार्थस्य क्रियाविनियोगव्यापारसम्पादनाय सम्बोधनाश्रयो नीयते। सम्बोधनार्थमागता विभक्तिरामन्त्रित इति नाम्ना ख्यायते। यथा– 'हे कृष्ण ! अत्रागच्छ।' इति वाक्ये 'हे कृष्ण !' इत्यत्र सु विभक्तेरर्थस्सम्बोधनमिति तथा च सु इति आमन्त्रितसञ्ज्ञात्वेनाभिधीयते। अत्र सम्बोधने कृष्ण+सु इत्यवस्थायामनुबन्धलोपे सति एङ्ह्रस्वात् सम्बुद्धेः (अ. ६।१।६) इति सूत्रेण स् इत्यस्य लोपो भवति। तत्र 'हे' इति अव्ययपदं सम्बोधनस्य स्पष्टार्थं वर्तते। 'हे' इति पदं विनापि सम्बोधनस्य गतार्थता भवति एव। लोके यथा 'गोपाल ! गोपाल !' इति सम्बोधनक्रियानुकूलव्यापारेण गोपालः नामकः कश्चिज्जनोऽस्ति, तस्य गतार्थता तु भवति एव। सम्बोधनार्थस्य अन्यव्यापारेष्वन्वयबोधो भवति, तेनैव अन्यवाक्यस्याध्याहारः क्रियते। यथा – 'हे जगदम्ब !' इति कथनेन 'हे जगदम्ब ! मां रक्षतु', इत्यस्याध्याहारो भवितुं शक्यते। यतोहि 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते।' इति न्यायात्। कार्यं विना तु सम्बोधनं न क्रियते, अतः यथा व्यवस्थया वाक्यस्याध्याहारः कर्त्तव्यः। अत्र हे राम !, हे हरे !, इत्यादिषु सम्बोधनपदेषु प्रातिपदिकधर्मत्वन्तु अस्त्येव पुनः सम्बोधने च (अ.२।३।४७) इति पृथक् सूत्रग्रहणं किमर्थम् ? समाधानत्वेन प्रातिपदिकधर्मावच्छिन्नसम्बोधनपदानि भवन्ति एव इति तु सत्यम्। परम् अभिमुखीकरणानुकूलव्यापारस्याधिक्येनेह पृथक् सूत्रग्रहणमावश्यकं विराजते। इति दिक्।

**निष्कर्षः**

कारकप्रकरणे प्रथमाविभक्तेः अर्थः पञ्चधा विहितोस्ति। प्रातिपदिकार्थः लिङ्गं, परिमाणं, वचनं सम्बोधनं च। चतुष्टयस्य कृते प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (अ. २।३।४६) इति सूत्रमस्ति अन्तिमस्य कृते सम्बोधने च (अ.२।३।४७) इति। प्रथमसूत्रस्य परिमाणम् अन्तरेण प्रातिपदिकार्थलिङ्ग वचनस्य क्षेत्रे प्रातिपदिकार्थे प्रथमा स्यात्। परिमाणस्य क्षेत्रे तु मात्राधिक्ये प्रथमा स्यात्। यथा – द्रोणो व्रीहिः। द्रोणरुपं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरित्यर्थः। वाक्ये द्रोण सु इत्यत्र 'सु' प्रत्ययेन प्रथमाविभक्त्या वा परिमाणार्थस्य

प्रतीतित्या वाक्यस्थः द्रोणः परिमाणमात्राधिक्ये प्रथमायाः उदाहरणम् । यदि परिमाणं विना केवलं पात्रं अवबुध्यते तर्हि प्रातिपदिकार्थे प्रथमा स्यात् । लिङ्गंविशेषेण कृष्णादिनियतलिङ्गशब्दस्य नित्यपुंलिङ्गं, नित्यस्त्रीलिङ्गं नित्यनपुंसकलिङ्गंच सुनिश्चितं भवतीति प्रातिपदिकार्थे प्रथमा स्यात् ।

प्रथमाविभक्तेः चतुर्थविषयोस्ति वचनं संख्या वा । संख्यावाचकशब्दस्य वचनं प्रातिपदिकस्य एव अर्थः । प्रातिपदिकार्थत्वात् अभिहिते प्रथमा । संख्यावाचकशब्दं विना अपरस्य शब्दस्य वचनन्तु प्रथमाविभक्तेरेव भवति । तस्मिन् स्थले वचनमात्राधिक्ये प्रथमा अनभिहिते प्रथमा वा । केवलं प्रातिपदिकार्थाद्यअभिहितत्वात् यत् प्रथमा स्यात् न तत्तु । कर्मकरणसम्प्रदानापादानाधिकरणकारकमपि अभिहितात्वादेव प्रथमा स्यात् । सम्बोधनमपि एकः विशेषार्थे विभक्तेः विषयः न कारके विभक्तिः । कारके विभक्तौ सत्यां सह अन्वितः स्यात् क्रियान्वयिकारकम् इति नियमेन । अभिमुखीकृत्य ज्ञापनं सम्बोधनम् । तत्र प्रथमा विभक्तिः स्यात् । यथा – हे नर, हे पितरौ, अयि मातरः, इत्यादि ।

## कृतज्ञताज्ञापनम्

प्रस्तुतरचनायां प्रविध्यादिषु विषयेषु परामर्शदातृभ्यो गुरुजनेभ्यो हार्दान् धन्यवादान् वितरामि ।

## सन्दर्भग्रन्थसूची

दीक्षितः, भट्टोजिः (सं.२००८), वैयाकरणसिद्धान्तकौमुदी, वाराणसी , चौखम्बा सुरभारती प्रकाशन ।
नागेशः परमलघुमञ्जूषाः, ( रत्नदीपिका व्याख्योपेता ) रामघाट, वाराणसी , साङ्गवेदविद्यालयः ।
पतञ्जलि; (२०३१) व्याकरणमहाभाष्यम्, वनारस , चौखम्बा संस्कृत सीरिज ।
पाणिनिः (सन् २०००), अष्टाध्यायी, गोपालदत्तपाण्डेयः (सं), वाराणसी , चौखम्बा सुरभाती प्रकाशन ।
भिक्षु गौरीशङ्करः (संवत् १९९७) सर्वलक्षणसङ्ग्रहः, (पञ्चम संस्करणम्) हिसार , भार्गव मुद्रालय ।
मिश्र, पं. ब्रह्मदत्तः (संवत् २०३४), समासचक्रम्, वाराणसी , चौखम्बा संस्कृत संस्थान ।
याज्ञवल्क्यः (सन् १९९८), याज्ञवल्क्यस्मृतिः, दिल्ली , चौखम्बा संस्कृत प्रतिष्ठान ।